# ॥ श्रीशिवसुवर्णमालास्तवः ॥

.. shrIshivasuvarNamAlAstavaH ..

sanskritdocuments.org

March 25, 2017

# .. shrIshivasuvarNamAlAstavaH ..

# ॥ श्रीशिवसुवर्णमालास्तवः ॥

## Sanskrit Document Information

Text title : shrIshivasuvarNamAlAstavaH

File name : shrIshivasuvarNamAlAstavaH.itx

Location : doc_shiva

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 25, 2017

*sanskritdocuments.org*

# ॥ श्रीशिवसुवर्णमालास्तवः ॥

श्रीगणेशाय नमः ॥

अनेककोटिब्रह्माण्डजननीनायकप्रभो ।
अनेकप्रमुखस्कन्दपरिसेवित पाहि माम् ॥ १॥

आकारापारनिर्व्याजकरुणायाः सतीपते ।
आशाभिपूरकानम्रविततेः पाहि शङ्कर ॥ २॥

इभाश्वमुखसम्पत्तिदानदक्षकृपालव ।
इष्टप्रालेयशैलेन्द्रपुत्र्याः पाहि गिरीश माम् ॥ ३॥

ईहाशून्यजनावाप्य नतानन्दाब्धिचन्द्रमः ।
ईशान सर्वविद्यानामिन्दुचूड सदाऽव माम् ॥ ४॥

उरगाधिपसंराजत्पदपङ्केरुहद्वय ।
उडुराजकृतोत्तंस गिरिजासख मामव ॥ ५॥

ऊरीकृतविनम्रेष्टपूगसम्पूरणव्रत ।
अखिलामरकोटीरनिघृष्टपद पाहि माम् ॥ ६॥

ऋद्धिदाम्भोजवासायाः काममाशु नमत्ततेः ।
शैलेन्द्रतनयाऽऽश्लिष्ट शर्व मां पाहि सर्वदा ॥ ७॥

ॠस्वराख्येयरूपाय भूतिदायादराद्धुतम् ।
षण्मुखेभास्यपूज्याय नमश्चन्द्रार्धमौलये ॥ ८॥

ऌकाराख्याय लक्ष्मीशद्रुहिणाद्यर्चिताङ्घ्रये ।
अपारकरुणाजन्मभूमये शम्भवे नमः ॥ ९॥

ॡस्वरूप ललाटाक्ष लाकिन्यादिनिषेवित ।
लावण्याकर कारुण्यवारिधे पाहिमां प्रभो ॥ १०॥

एणाङ्कचूड काणादशास्त्रप्रज्ञाप्रदायक ।
शोणाधर नमस्यामि त्वत्पादाम्बुरुहद्वयम् ॥ ११॥

ऐहिकामुष्मिके पुंसां सुलभे यत्पदार्चनात् ।
चन्द्रार्धविलसन्मौलिं नमामि तमुमापतिम् ॥ १२॥

ओमित्याख्यां यस्य वेदा वेदान्ताश्च जगुर्मुहुः ।
ओङ्कारजपतुष्टं तं नौमि चन्द्रार्धशेखरम् ॥ १३॥

औदासीन्यं समस्तेषु विषयेषु प्रकुर्वताम् ।
सुलभं जगदीशानं पार्वतीपतिमाश्रये ॥ १४॥

अङ्गशोभापराभूतकोटिराकानिशाकरम् ।
अन्तकान्तककामादिगर्वहारिणमाश्रये ॥ १५॥

अश्च उश्च मकारश्च यन्नामावयवाक्षराः ।
अशेषशुभदातारं तं नौमि शशिशेखरम् ॥ १६॥

कविता वृणुते रतीशतुल्यं पतिमास्थासहितेव मानिनी ।
तरसा पुरुषं यदङ्घ्रिनम्रं तमहं नौमि शशाङ्कबालचूडम् ॥ १७॥

खण्डेन चान्द्रेण किरीटगेन विराजमानं वृषभाधिरूढ ।
खवायुतेजोऽम्बुधरादिरूपं नमामि शैलेन्द्रसुतासमेतम् ॥ १८॥

गद्यानि पद्यानि च शीघ्रमेव मूकस्य वक्त्रादपि निःसरन्ति ।
यदीयकारुण्यलवात्तमीशं नमामि चन्द्रार्धकभासिमौलिम् ॥ १९॥

घटोद्भवाद्या मुनयो यदङ्घ्रिसमर्चनातो महतीं प्रपन्नाः ।
सिद्धिं तमानम्रजनेष्टदाननिबद्धदीक्षं प्रणमामि शम्भुम् ॥ २०॥

नकारवाच्याय नमज्जनौघविद्याप्रदानप्रवणाय शीघ्रम् ।
वटागमूलैकनिकेतनाय श्रीदक्षिणास्याय नमः शिवाय ॥ २१॥

चयेन भासां वपुषश्चकोरबन्धुं जयन्तं जितपुष्पचापम् ।
प्रालेयशैलेन्द्रसुतामनोऽब्जभानुं भजे कञ्चन देववर्यम् ॥ २२॥

छत्रं च वालव्यजने मनोज्ञे समुद्रकाञ्चीं पृथिवीं च लोकाः ।
जवाद्व्रजन्तेऽप्यतिकिम्पचाना यदङ्घ्रिनम्रास्तमुमेशमीडे ॥ २३॥

जन्मस्वनेकेषु विधाय धर्मान्स्ववर्णयोग्यान्मनुजोऽतिभक्त्या ।
जिज्ञासते यत्पदमादरेण तं नौमि सच्चित्सुखरूपमीशम् ॥ २४॥

झरीं दधानं दिविषत्तटिन्या झटित्ययोग्यानपि भक्तिपूर्णान् ।
पुनानमर्धेन्दुलसत्किरीटं युवानमीशं कलयामि चित्ते ॥ २५॥

नकाररूपाय रवीन्दुवह्निनेत्राय नानाविधरूपधर्त्रे ।

लोकावनायातिमनोहराय शैलेन्द्रकन्यापतये नमोऽस्तु ॥ २६॥

टवर्णवाच्याय तडित्प्रभाय यमादियोगाङ्गविदर्चिताय ।
शमादिसम्पत्सहिताप्यपादपद्माय गौरीपतये नमोऽस्तु ॥ २७॥

ठपुक्त्रिवर्णप्रतिपादिताय हराय निःशेषविषाघहर्त्रे ।
श्रीनीलकण्ठाय यमिप्रवीरध्येयाय कुर्मः प्रणतिं प्रमोदात् ॥ २८॥

डामरप्रमुखदुःखसमूहध्वंसदक्षचरणस्मरणस्य ।
शैलजाहृदयपङ्कजभानोः शङ्करस्य चरणौ प्रणतोऽस्मि ॥ २९॥

ढक्काख्यवाद्यश्रवणोत्सुकाय प्रौढाय कन्दर्पशरप्रभेदे ।
शिवाय चन्द्रार्धलसज्जटाय कुर्मः प्रमोदात्प्रणतेः सहस्रम् ॥ ३०॥

णान्तदादिहरिदुत्सुखमूर्ते नाकनाथपरिसेवितपाद ।
वासलोल वटवृक्षतले मां वाराणस्यामिव पाहि दयालो ॥ ३१॥

तप्ताः संसृतिवह्निना भुवि नराः सम्प्राप्य सद्देशिकं
तस्यास्याच्छ्रुतिशीर्षवाक्यनिचयं श्रुत्वार्थयुक्तं मुहुः ।
युक्त्या श्रुत्यविरुद्धया तदनुसञ्चिन्त्यार्थमाद्योदितं
ध्यात्वाऽजस्रमवाप्नुवन्ति यमहं तं नौमि गौरीपतिम् ॥ ३२॥

थायैयेति समस्तदेववनिता नृत्यं यदग्रेऽन्वहं
कुर्वन्त्यम्बुजसम्भवप्रभृतयः स्तुन्वन्ति वेदैश्च यम् ।
इन्द्राणीशरमाधवादिमसुरा यस्यार्चनां कुर्वते
कल्पागप्रभवैः सुमैस्तमनिशं नौम्यादिजावल्लभम् ॥ ३३॥

इति श्रीशिवसुवर्णमालास्तवः सम्पूर्णः ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIshivasuvarNamAlAstavaH ..
was typeset using XƎLATEX 0.99996
on March 25, 2017

Please send corrections to *sanskrit@cheerful.com*